# ॥ रकारादि श्रीपरशुरामाष्टोत्तरशतनामस्तोत्रम् ॥

.. rakArAdi shrI parashurAmAShTottarashatanAmastotram ..

sanskritdocuments.org

July 26, 2016

# Document Information

Text title : rakArAdi parashurAmAShTottarashatanAmastotram
File name : rakArAdiparashurAma108nAmastotram.itx
Category : aShTottarashatanAma
Location : doc_vishhnu
Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra
Language : Sanskrit
Subject : philosophy/hinduism/religion
Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com
Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA
Latest update : January 24, 2016
Send corrections to : sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

# ॥ रकारादि श्रीपरशुरामाष्टोत्तरशतनामस्तोत्रम् ॥

@@
श्री हयग्रीवाय नमः ।
हरिः ॐ

रामो राजाटवीवह्नि रामचन्द्रप्रसादकः ।
राजरक्तारुणस्नातो राजीवायतलोचनः ॥ १॥

रैणुकेयो रुद्रशिष्यो रेणुकाच्छेदनो रयी ।
रणधूतमहासेनो रुद्राणीधर्मपुत्रकः ॥ २॥

राजत्परशुविच्छिन्नकार्तवीर्यार्जुनद्रुमः ।
राताखिलरसो रक्तकृतपैतृकतर्पणः ॥ ३॥

रत्नाकरकृतावासो रतीशकृतविस्मयः ।
रागहीनो रागदूरो रक्षितब्रह्मचर्यकः ॥ ४॥

राज्यमत्तक्षत्त्रबीज भर्जनाग्निप्रतापवान् ।
राजद्भृगुकुलाम्बोधिचन्द्रमा रञ्जितद्विजः ॥ ५॥

रक्तोपवीतो रक्ताक्षो रक्तलिप्तो रणोद्धतः ।
रणत्कुठारो रविभूदण्डायित महाभुजः ॥ ६॥

रमानाधधनुर्धारी रमापतिकलामयः ।
रमालयमहावक्षा रमानुजलसन्मुखः ॥ ७॥

रसैकमल्लो रसनाऽविषयोद्दण्ड पौरुषः ।
रामनामश्रुतिस्त्रस्तक्षत्रियागर्भसञ्चयः ॥ ८॥

रोषानलमयाकारो रेणुकापुनराननः ।
राधेयचातकाम्भोदो रुद्धचापकलापगः ॥ ९॥

राजीवचरणद्वन्द्वचिह्नपूतमहेन्द्रकः ।
रामचन्द्रन्यस्ततेजा राजशब्दार्धनाशनः ॥ १०॥

राद्धदेवद्विजव्रातो रोहिताश्वाननार्चितः ।
रोहिताश्वदुराधर्षो रोहिताश्वप्रपावनः ॥ ११॥

रामनामप्रधानार्धो रत्नाकरगभीरधीः ।
राजन्मौञ्जीसमाबद्ध सिंहमध्यो रविद्युतिः ॥ १२॥

रजताद्रिगुरुस्थानो रुद्राणीप्रेमभाजनम् ।
रुद्रभक्तो रौद्रमूर्ती रुद्राधिकपराक्रमः ॥ १३॥

रविताराचिरस्थायी रक्तदेवर्षिभावनः ।
रम्यो रम्यगुणो रक्तो रातभक्ताखिलेप्सितः ॥ १४॥

रचितस्वर्णसोपानो रन्धिताशयवासनः ।
रुद्धप्राणादिसञ्चारो राजद्ब्रह्मपदस्थितः ॥ १५॥

रत्नसूनुमहाधीरो रसासुरशिखामणिः ।
रक्तसिद्धी रम्यतपा राततीर्थाटनो रसी ॥ १६॥

रचितभ्रातृहननो रक्षितभातृको रणी ।
राजापहृततातेष्टिधेन्वाहर्ता रसाप्रभुः ॥ १७॥

रक्षितब्राह्म्यसाम्राज्यो रौद्राणेयजयध्वजः ।
राजकीर्तिमयच्छत्रो रोमहर्षणविक्रमः ॥ १८॥

राजशौर्यरसाम्भोधिकुम्भसम्भूतिसायकः ।
रात्रिन्दिवसमाजाग्र त्प्रतापग्रीष्मभास्करः ॥ १९॥

राजबीजोदरक्षोणीपरित्यागी रसात्पतिः ।
रसाभारहरो रस्यो राजीवजकृतक्षमः ॥ २०॥

रुद्रमेरुधनुर्भङ्ग कृद्धात्मा रौद्रभूषणः ।
रामचन्द्रमुखज्योत्स्नामृतक्षालितहृन्मलः ॥ २१॥

रामाभिन्नो रुद्रमयो रामरुद्रो भयात्मकः ।
रामपूजितपादाब्जो रामविद्वेषिकैतवः ॥ २२॥

रामानन्दो रामनामो रामो रामात्मनिर्भिदः ।
रामप्रियो रामतृप्तो रामगो रामविश्रमः ॥ २३॥

रामज्ञानकुठारात्त राजलोकमहातमाः ।
रामात्ममुक्तिदो रामो रामदो राममङ्गलः ॥ २४॥

मङ्गलं जामदग्न्याय कार्तवीर्यार्जुनच्छिदे ।
मङ्गलं परमोदार सदा परशुराम ते ॥ २५॥

मङ्गलं राजकालाय दुराधर्षाय मङ्गलं ।
मङ्गलं महनीयाय जामदग्न्याय मङ्गलम् ॥ २६॥

जमदग्नि तनूजाय जिताखिलमहीभृते ।
जाज्वल्यमानायुधाय जामदग्न्याय मङ्गलम् ॥ २७॥

॥ इति रामेणकृतं पराभवाब्दे वैशाखशुद्ध त्रितीयायां

परशुराम जयन्त्यां रकारादि श्री परशुरामाष्टोत्तरशतम्
श्री हयग्रीवाय समर्पितम् ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

<◌ःऱ्>

---

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

---

Please help to maintain respect for volunteer spirit.

---

.. rakArAdi shrI parashurAmAShTottarashatanAmastotram ..
was typeset on July 26, 2016

Please send corrections to *sanskrit@cheerful.com*